This is a digital copy of a book that was preserved for generations on library shelves before it was carefully scanned by Google as part of a project to make the world's books discoverable online.

It has survived long enough for the copyright to expire and the book to enter the public domain. A public domain book is one that was never subject to copyright or whose legal copyright term has expired. Whether a book is in the public domain may vary country to country. Public domain books are our gateways to the past, representing a wealth of history, culture and knowledge that's often difficult to discover.

Marks, notations and other marginalia present in the original volume will appear in this file - a reminder of this book's long journey from the publisher to a library and finally to you.

Usage guidelines

Google is proud to partner with libraries to digitize public domain materials and make them widely accessible. Public domain books belong to the public and we are merely their custodians. Nevertheless, this work is expensive, so in order to keep providing this resource, we have taken steps to prevent abuse by commercial parties, including placing technical restrictions on automated querying.

We also ask that you:

+ *Make non-commercial use of the files* We designed Google Book Search for use by individuals, and we request that you use these files for personal, non-commercial purposes.
+ *Refrain from automated querying* Do not send automated queries of any sort to Google's system: If you are conducting research on machine translation, optical character recognition or other areas where access to a large amount of text is helpful, please contact us. We encourage the use of public domain materials for these purposes and may be able to help.
+ *Maintain attribution* The Google "watermark" you see on each file is essential for informing people about this project and helping them find additional materials through Google Book Search. Please do not remove it.
+ *Keep it legal* Whatever your use, remember that you are responsible for ensuring that what you are doing is legal. Do not assume that just because we believe a book is in the public domain for users in the United States, that the work is also in the public domain for users in other countries. Whether a book is still in copyright varies from country to country, and we can't offer guidance on whether any specific use of any specific book is allowed. Please do not assume that a book's appearance in Google Book Search means it can be used in any manner anywhere in the world. Copyright infringement liability can be quite severe.

About Google Book Search

Google's mission is to organize the world's information and to make it universally accessible and useful. Google Book Search helps readers discover the world's books while helping authors and publishers reach new audiences. You can search through the full text of this book on the web at `http://books.google.com/`

IndL 3353.4.5

Muddu Subba Kavi. Sańksiptarā-
màyana. 1901

Digitized by Google

Ind L 3353.4.5

VE RI TAS

Harvard College Library

THE BEQUEST OF

Charles R. Lanman

PROFESSOR OF SANSKRIT

1880–1926

Digitized by Google

Bd

DEC 24 1906

CHARLES R. LANMAN
9 FARRAR ST.,
CAMBRIDGE, - MASS.

श्रीः

श्रीमुद्दुसुब्बकविविरचितम्

संक्षिप्तरामायणम्

By Muddu Subba Kavi father of Lakshmana Suri

नाम

काव्यम्

तत्पुत्रेण

श्रीलक्ष्मणसूरिणा

तञ्जानगराधिष्ठितायां

"पूर्णचन्द्रोदयाख्यमुद्राक्षरशालायां"

मुद्रितम्

सत्

विजयतेतराम्

Copy Right Registered.

1901.

Digitized by Google

Digitized by Google

श्रीः

श्रीमुडुम्बकविविरचितम्

संक्षिप्तरामायणम्

नाम

काव्यम्

तत्पुत्रेण

श्रीलक्ष्मणसूरिणा

तञ्जानगराधिष्ठितायां

"पूर्णचन्द्रोदयाख्यमुद्राक्षरशालायां"

मुद्रितम्

सत्

विजयतेतराम्

Copy Right Registered.

1901.

Digitized by Google

Ind L 3353.4.5

HARVARD
UNIVERSITY
LIBRARY

Muddu Subba kavi
= Saṅkṣiptarāmāyaṇa, etc.

Digitized by Google

॥ श्रीः ॥

श्रीमुकुन्दकविविरचितम्

॥ संक्षिप्तरामायणम् ॥

———०ᳲ:०:ᳲ०———

ससीतालक्ष्मणं वन्दे रामं राजीवलोचनम् ।
यन्नामकीर्तनाल्लोको मुच्यते भवबन्धनात् ॥ १ ॥

संक्षिप्ताच्च क्रमेणार्थैः संक्षिप्याद्य मया स्तुतः ।
स्वदेत रामवृत्तान्तो न किं संशृतदुग्धवत् ॥ २ ॥

अस्त्ययोध्येति विख्याता वैकर्तनमहीभुजाम् ।
राजधानी स्वया लक्ष्म्या हसन्तीवामरावतीम् ॥ ३ ॥

आसीद्दशरथो नाम तस्यां नृपतिसत्तमः ।
सर्वे च वश्या यस्यासन्बलिनो नयचक्षुषः ॥ ४ ॥

सोऽनपत्योऽपत्यकृतं पूर्णत्वं शास्त्रवित्स्मरन् ।
अदूयतापूर्णमानी शक्रतुल्यर्द्धिभागपि ॥ ५ ॥

तेनानुयुक्तः पुत्रार्थं चिरेण तपता भृशम् ।
प्रत्यग्दशां प्रवेकोऽथ ब्रह्मसूनुरभाषत ॥ ६ ॥

आहरन्नेव पुत्रीयमृश्यशृङ्गर्त्विजं मखम् ।
लप्स्यसे कामनासिद्धिं त्रिवर्गलघुपद्धतिम् ॥ ७ ॥

इत्युक्ते गुरुणा भूपेऽमात्या लालाटिकाः प्रभोः ।
जग्मुस्तमानिनीषन्तो मुनिं वैभण्डकिं क्षणात् ॥ ८ ॥

यदा विधिवदानीय शान्तया मुनिरर्चितः ।
तदैव शमन्ववापेऽमुत्पुत्रं लब्ध्वेव भूपतिः ॥ ९ ॥

Digitized by Google

ततस्तदुपदिष्टेन विधिना स यथाविधि ।
सप्ततन्तुं करोति स्म पुत्रीयं सरयूतटे ॥ १० ॥

रावणोपप्लवक्लान्तानथ सेन्द्रान्सुपर्वणः ।
आदाय प्रययौ वेधा हरिं क्षीराब्धिशायिनम् ॥ ११ ॥

अद्राक्षुः कलशाम्भोधेरात्तवेला दिवौकसः ।
भुजङ्गराजशयनमजं गरुडवाहनम् ॥ १२ ॥

गतागतेषु संभ्रान्ताद्वर्षर्तुनवनीरदात् ।
प्रभ्रष्टमिव तच्छावं नीलाङ्गरुचिमेदुरम् ॥ १३ ॥

स्पृष्टोऽथ कमलाजानेर्विधातापाङ्गधारया ।
सहस्रकृत्वः प्राणंसीत्कार्यं चास्मै व्यजिज्ञपत् ॥ १४ ॥

निध्याय रक्षोदुर्वृत्तं निर्जराणां च दुर्दशाम् ।
स बभाषे शरच्चन्द्रचन्द्रिकासुन्दरस्मितः ॥ १५ ॥

मा भैष्ट देवाः शोकेन कृतं भीर्व्येतु रावणात् ।
तं हनिष्यामि झटिति नीहारमिव भानुमान् ॥ १६ ॥

किंतु वंशे रघोराजेः पुत्रत्वं मे गमिष्यतः ।
साहाय्यार्थं जनयत तनयान् कीशयोनिषु ॥ १७ ॥

इत्थमुक्त्वा रमानाथे व्रजत्यक्ष्णोरगोचरम् ।
करिष्यन्तस्तदादेशं देवा जग्मुर्यथागतम् ॥ १८ ॥

प्रादुर्भूतमभौमान्नं दत्त्वा स्त्रीभ्यस्ततोऽध्वरे ।
उपजग्मे पुरीं राज्ञा कृतावभृथकर्मणा ॥ १९ ॥

अथ कालेन तत्पत्न्यो गर्भेण चिरकांक्षिताम् ।
प्राप्य श्रद्धालुतां सद्यो जहुरन्यत्र तां दृढाम् ॥ २० ॥

Digitized by Google

कौसल्या सुषुवे रामं कैकेयी भरतं सुतम् ।
यमौ लक्ष्मणशत्रुघ्नौ सुमित्रापि गुणाकरौ ॥ २१ ॥

प्रसेदुरापो जज्वाल भास्वान्मन्दं ववौ मरुत् ।
तदा जगति सर्वेषां समं समभवन्महः ॥ २२ ॥

क्रमाद्दधुः कुमारास्ते निःशेषामुक्तशैशवाः ।
कङ्कपक्षादिकं बाह्वोः काकपक्षं च मूर्धनि ॥ २३ ॥

अथ जातुचिदागत्य राज्ञा विधिवदार्चितः ।
कौशिको यज्ञरक्षार्थमर्थयामास राघवम् ॥ २४ ॥

वसिष्ठवाक्यापगतराक्षसातङ्कमन्युना ।
कुमारद्वयमस्पर्शि कौशिकाय महीभुजा ॥ २५ ॥

गुरुं तमनुगच्छन्ताविन्द्रोपेन्द्राविवाध्वनि ।
काश्चिद्दिव्याः कथाश्चास्माच्छ्रुत्वाभाते रामलक्ष्मणौ ॥ २६ ॥

ततः कृशाश्वोपज्ञानि जृम्भकास्त्राणि राघवः ।
आददे ताटकामाथे पारितोषिकदान्मुनेः ॥ २७ ॥

अथारब्धमखे तस्मिन् जीवायुक्तं धनुः परम् ।
स चकाराशरान्नाजावहंपूर्विकयागतान् ॥ २८ ॥

समाप्तदीक्षः स्वस्येव जनकस्य कृतावपि ।
श्रियं ग्राहयितुं रामं विश्वामित्रो व्यचिन्तयत् ॥ २९ ॥

अपूर्वविषयालोकसुखिभ्याममरापगा ।
सहैव रघुबालाभ्यामुत्तीर्णा गाधिसूनुना ॥ ३० ॥

मध्येवर्त्म चिराद्भ्रष्टामग्निमत्तां तु गौतमे ।
पुनः संधापयामासुरस्य मृद्वङ्घ्रिरेणवः ॥ ३१ ॥

Digitized by Google

वैदेहो मुनिमायान्तमर्हयित्वार्हतां वरम् ।
अविघ्नं तपसोऽपृच्छद्राज्यस्यानामयं स च ॥ ३२ ॥

परस्परेण स्तुवतोर्गाधिगौतमपुत्रयोः ।
राजा सानुनयं वाक्यमाह सीरध्वजोऽन्तरे ॥ ३३ ॥

जिज्ञासे काविमौ ब्रह्मन्नपि पार्थिवलक्षणौ ।
लावण्यामृतधाराभिर्ममाङ्क इव चक्षुषी ॥ ३४ ॥

अनयोर्जन्मना को वा राजन्यो धन्यतां गतः ।
इत्युक्तवन्तं राजानं प्रत्याह कुशिकात्मजः ३५ ॥

इमौ दाशरथी राजन्भ्रातरौ रामलक्ष्मणौ ।
आनीतौ मखरक्षार्थं मया दशरथान्तिकात् ॥ ३६ ॥

एष रामोऽग्रजोऽनेन यज्ञविघ्नकरा हताः ।
इतश्चायं पुण्यजनान् सर्वान् संस्थापयिष्यति ॥ ३७ ॥

एवं फलाशिनां प्राणैः सर्म निर्वर्तिते क्रतौ ।
प्रसङ्गादजनिष्यस्य भवत्पादसिसेविषा ॥ ३८ ॥

आरोप्यान्यैर्दुरारोपमेष कन्यापणं धनुः ।
त्वामद्य कुर्यान्निस्तीर्णप्रतिज्ञं यदि मन्यसे ॥ ३९ ॥

तमन्वमानान्नृपतिः स्वाधीनेऽस्मिन् जनेऽन्वयत ।
किं विकल्पेन भगवन्यथेष्टं क्रियतामिति ॥ ४० ॥

अथ तेन कुमारेणाऽन्या घटयता गुणम् ।
भज्यते स्म धनुर्दण्डो मानेन सह धन्विनाम् ॥ ४१ ॥

प्रहृष्यादिशतस्तावज्जनकस्य पुरोधसा ।
प्रेषिता कोसलेन्द्राय सीताकल्याणपत्रिका ॥ ४२ ॥

Digitized by Google

संमर्दजनिता धूलिर्नृणां दिग्भ्यः समेयुषाम् ।
साकेतमिथिलापत्योः प्रशेमे मुत्पयोझरैः ॥ ४३ ॥
लक्ष्मणायोर्मिला देयेत्याजिराशां स पूरयन् ।
कुशध्वजसुते च स्तामन्ययोरिति चाब्रवीत् ॥ ४४ ॥
परिष्कृतं कुमारास्ते स्थितमत्युपमे पदे ।
मण्डपं शोभयांचक्रुः कृतकौतुकमङ्गलाः ॥ ४५ ॥
तदा दुन्दुभिनिर्घोषी ब्रह्मघोषैर्दिवं ययौ ।
पुष्पवृष्टिस्तु देवानां पौरानन्दजलैर्भुवम् ॥ ४६ ॥
ते चत्वारश्चतमृणां जगत्पीडापहं क्रमात् ।
कुमारा राजपुत्रीणां व्यदधुः पाणिपीडनम् ॥ ४७ ॥
सीतया जनकादात्तानेकयौतकसंपदा ।
सानुगोऽथ समं रामः प्रतस्थे स्वां पुरीं प्रति ॥ ४८ ॥
रुरोध क्षत्रसंवर्तकुठारक्रूरदर्शनः ।
भार्गवो मुनिरध्वानं राघवस्य जिगीषया ॥ ४९ ॥
दृप्यता मुनिना दत्तं धनुरेव न राघवः ।
नम्रीचकार तं चायं प्राणच्युतिभयार्दितम् ॥ ५० ॥
मूर्ध्न्याशिषं भृगुसुतेन दधद्वितीर्णा-
  मंसे च तद्धनुरपि तस्य महाभुजः ।
साकेतमेत्य नयवित्सकलप्रजाना-
  माह्लादको विधुरिवाजनि रामचन्द्रः ॥ ५१ ॥

इति श्रीमुद्दुमुब्भकविविरचिते संक्षिप्तरामायणे
॥ बालकाण्डः ॥

Digitized by Google

अयोध्याकाण्डः

गच्छ मातुलकुले स्वबान्धवान्प्रीणयन्वस चिरोत्सुकानिति ।
आज्ञया पितुरमुक्तसोदरस्तज्जगाम भरतो महामतिः ॥ १ ॥
एकदा स चकमे जरन्नृपो दुर्भरं चिरधृतं भुवो भरम् ।
आत्मजे लघयितुं दमोज्ज्वले सर्वसंवननसद्गुणाकरे ॥ २ ॥
तद्विभेदयितुकामयेरिता केकयी हितगिरेव कुब्जया ।
इत्यशिश्रवत भूभुजे वरौ देहि मे युधि पुरा प्रतिश्रुतौ ॥ ३ ॥
तत्र शास्तु भरतो वसुंधरामेक एवमपरो वरस्तु मे ।
राम आश्रितमुनिव्रतो वने संचरत्विति समाश्चतुर्दश ॥ ४ ॥
वज्रपातपरुषं निशम्य तत्सत्यवाङ्श्रवणदारणं वचः ।
कृत्तमूल इव भूरुहस्तदा राम हेति निपपात भूपतिः ॥ ५ ॥
निर्दयत्वमुपदर्श्य यावतीरुज्जगार रुशतीः स योषिति ।
सापि भूभुजि निरूप्य दुर्मतिस्तावतीरथ मृषार्थवादिताम् ॥ ६ ॥
राघवाय पितरं शुचातुरं वीक्ष्य शङ्किताधिये त्वतद्विदे ।
बद्धकौतुककराय पृच्छते तन्निदानमपभीरुवाच सा ॥ ७ ॥
त्वं तपस्य विपिने तवानुजः पालयत्ववनिमस्य शोचने ।
हेतुरेष इति मातुराददे शासनेन सह सोऽपि वल्कलम् ॥ ८ ॥
रुद्धयापि रचितानुयात्रया सीतयेव सह पौरचेतसा ।
आरुरोह स सुमन्त्रयन्त्रितं स्यन्दनं रघुपतिः सलक्ष्मणः ॥ ९ ॥
भिल्लभूभृदुपनीतनौसमुत्तीर्णनिर्जरतरङ्गिणीजलः ।
संचचार स सदारसोदरो न्यकाल्पितजटस्तपोवने ॥ १० ॥

Digitized by Google

आवहञ्शिरसि भूषणं मुनेरङ्घ्रिरेणुमनुजेन निर्मिते ।
चित्रकूटभुवि पर्णमन्दिरे सीतया सुखमुवास राघवः ॥ ११ ॥

सारथिस्तु पुनरागमे विभोराशयादिव मनोरथं रथम् ।
संनिवर्त्य सुरनिम्नगातटादार्त आर्च्छदयथापुरं पुरम् ॥ १२ ॥

रामशून्यरथदर्शनात्परं पौरमुन्न विरराम केवलम् ।
पुत्रशोकदवदग्धचेतसः प्राणवायुरखिलोऽपि भूपतेः ॥ १३ ॥

भूपविक्रमकथानुरोधनै रामसद्गुणचरित्रवर्णनैः ।
केकयाधिपसुताविगर्हणैः पूरपूर्यखिलपौररोदनैः ॥ १४ ॥

देशिकस्य भरतः सुधीस्तु संदेशतस्तदनु मातुलालयात् ।
मुक्तरश्मितुरगः सहानुजः पूर्गतं निजमनोऽन्वधावत ॥ १५ ॥

शङ्कितं पुरमवेक्ष्य पादयोरानतं भरतमम्ब मे गुरुः ।
कुत्र वेति पितृदर्शनोत्सुकं त्वप्रियं प्रियमिवाह केकयी ॥ १६ ॥

त्वत्कृते शिथिलितं नृपाद्धृतं वत्स राममकुटाभिषेचनम् ।
द्रावितश्च वनमेव राघवः सीतया विधृतवल्कलाजिनः ॥ १७ ॥

तातमात्मजवियोगशोकतः संस्कुरुष्व विधिवन्मृतं ततः ।
पौरवृद्धकृतमौलिसेचनो निःसपत्नमनुभुङ्क्ष्व चावनिम् ॥ १८ ॥

इत्युषर्बुधसखी यदा हि गीरस्य कर्णमविशत्स्वमातृतः ।
सद्य एव हृदयं तदाजहाच्चेतना परमसह्यवेदनम् ॥ १९ ॥

लब्धसंज्ञ उरु भर्त्सयन्प्रसूं धिग्धिगित्यधिकरूक्षया गिरा ।
तद्गृहात्स ससहोदरः शुचा तप्यमानहृदयो विनिर्ययौ ॥ २० ॥

संस्क्रियां तु पितुरौर्ध्वदैहिकीमाहिताग्निविधिना विधाय सः ।
प्रार्थितोऽथ मकुटाय मन्त्रिभिः प्रत्यभाषत पुरःसरः सताम् ॥ २१ ॥

Digitized by Google

धारयेय मकुटं तदा ह्ययं दण्डकासु न लभेय चेद्वयम् ।
आश्रमं तपसितुं तथा जटासंयमाय च वटस्रुतं पयः ॥ २२ ॥

इत्युदीर्य कृतिनं कृतोद्यमं दण्डकावननिषेवणाय तम् ।
आशिशुस्थविरमन्वगुर्जना राघवाख्यममृतं पिपासवः ॥ २३ ॥

धूलिभिर्निजपदोत्थिताभिरुत्पादितामरधुनीकलङ्कया ।
सेनया स चतुरङ्गयाभवन्मातृभिश्च पथिकः पुरोधसा ॥ २४ ॥

राममेति भरतोऽभिषेणकः किं द्विषन्निति वितर्कयन्गुहः ।
शुद्धमस्य विमृशंस्तदाशयं तं मुदा सुरनदीमतीतरत् ॥ २५ ॥

आतिथेयविधिसत्कृतं भरद्वाज आर्यपदसेवयोत्सुकम् ।
तन्निवासकथया व्यशिश्रमद्दीनदीनमथ तं मुनिव्रतम् ॥ २६ ॥

तं विलोक्य विजिगीषयोद्यतं लक्ष्मणं विस्मयति स्म राघवः ।
वत्स मैवमपदे पदं कृथा अर्हतां हि भरतोऽग्रणीरिति ॥ २७ ॥

तत्र पर्णकुटिकाप्रसीमनि स्थण्डिलेऽजिनसमावृते स्थितम् ।
चीरिणं जटिनमावृतं मृगैः सेव्यमानमनुजेन च स्त्रिया ॥ २८ ॥

वीक्ष्य राममतदर्हदुर्दशं दुर्निवारतरशोकवेगितः ।
मत्कृते व्यसनमीदृशं विभोर्मा धिगित्यनुपदं विगर्हयन् ॥ २९ ॥

प्राप्य साधुरभिशस्तनामिव स्वात्मनात्मनि विशन्निव ह्रिया ।
पादमूलमनवाप्य विह्वलस्त्वार्य हेति भरतोऽपतद्भुवि ॥ ३० ॥

तं तथा पतितमाकुलं समाश्वास्य सम्यगितरांश्च पूजयन् ।
राघवः पितुरवेत्य तां गतिं तात हेति विललाप दुःखितः ॥ ३१ ॥

वृत्तवानतिवयाश्च ते पिता नैव शोच्य इति वृद्धबोधितः ।
लक्ष्मणेन सह पारलौकिकीश्चकृवान् रघुपतिः पितुः क्रियाः ॥ ३२ ॥

Digitized by Google

तं समाप्य विधिमागतं पुनः संप्रणम्य पदयोर्मुहुर्मुहुः ।
संप्रसादयितुकाम ऊचिवान् साञ्जलिर्भरत आर्यमार्यधीः ॥ ३३ ॥

आर्य सोन्नतिजुषां सतां गणैः संयुतापि भृशभासुरात्मनाम् ।
राजनि त्वयि वनं गते पुरी शर्वरीव न विराजतेतराम् ॥ ३४ ॥

लोकनाथ किमनाथवत्त्वया नाथवत्यपि विषीदति प्रजा ।
तावकीं वह जहीहि वा धुरं सर्वथापि खलु दुर्वहां मया ॥ ३५ ॥

इत्यकैतवमनोरमामसौ भारतीमथ निशम्य भारतीम् ।
राघवो मुदितमानसोऽप्युपच्छन्दयन्निजगिरा तमब्रवीत् ॥ ३६ ॥

वत्स किं पितृनिदेशवर्तनादन्यदस्ति करणीयमुत्तमम् ।
श्रूयते हि विनिमित्य वार्धकं योऽददात्स्वगुरवे निजं वयः ॥ ३७ ॥

तेन तातवचनं तदावयोः पाल्यमित्युपदिशन् रघूद्वहः ।
पादुके प्रतिभुवाविवात्मनो न्यासयन् स भरतं न्यवीवृतत् ॥ ३८ ॥

प्रत्यावृत्तः कथमपि ततः पादुके सोऽभिषिच्य-
नन्दिग्रामे दिनगणनातत्परो भ्रातुरास्त ।
रामस्त्वद्रिं जनपरिचर्यात्तापसानां च भावा-
न्मुञ्चन्नत्रेरपि बहुमतः प्राविशद्दण्डकायाम् ॥ ३९ ॥

इति श्रीमुद्दुमुब्बकविविरचिते संक्षिप्तरामायणे

अयोध्याकाण्डः

आरण्यकाण्डः

प्रविश्य रामो विपिनं सलक्ष्मणः प्रतप्तजाम्बूनदवर्णया स्त्रिया ।
चचार धन्वी गगने सकार्मुकः सविद्युदिन्द्रायुधलाञ्छितो घनः ॥ १ ॥

Digitized by Google

विराधनामाथ निशाचरस्तयोर्निरुध्य मार्गं वरदानदर्पितः ।
स्त्रियं प्रसह्यापहरन् रघूद्वहप्रतापवह्नौ शलभत्वमीयिवान् ॥ २ ॥

उपस्थितं शक्रमपि प्रयापयन् प्रियातिथिं राघवमर्चयन्मुनिः ।
समक्षमस्यैव तनुं त्यजन्दिवं सुरार्चितोऽगाच्छरभङ्ग आत्मवान् ॥ ३ ॥

ततः सुतीक्ष्णाश्रममेत्य तत्र ते सुसत्कृतास्तेन फलादिभिस्त्रयः ।
सुखेन तां न्युष्य निशां परेद्यवि प्रणम्य तेनानुमताः प्रतस्थिरे ॥ ४ ॥

समुद्रविन्ध्यावगते गभीरिमोन्नती विरुद्धे अपि यत्र सुस्थिते ।
तमाश्रमस्थं मुनिमेत्य भक्तितो ननाम रामो निजनाम कीर्तयन् ॥ ५ ॥

विलोक्य देवायतनानि विस्मितं हुताग्निरेनं विधिवत्समर्चयन् ।
ददावगस्त्योऽमितदीप्ति वैष्णवं धनुः स तस्मै सनिषङ्गसायकम् ॥ ६ ॥

तदाश्रमात्पञ्चवटीं द्वियोजनां तदाज्ञया दाशरथिर्व्रजन्पथि ।
समेत्य गृध्राधिपतिं जटायुषं पितुः सखायं पितृवन्ममान सः ॥ ७ ॥

सहैव तेनैत्य विवक्षितं स्थलं समे प्रदेशे सहजेन निर्मिताम् ।
स पर्णशालां सुखमावसत्समं विदेहपुत्र्या त्रिदिवं यथामरः ॥ ८ ॥

शरत्सु बह्वीषु गतासु हैमने वगाहनायापररात्र उत्थितः ।
गोदावरीं स प्रियया सह व्रजन्नूचेऽनुजेनानुगतेन राघवः ॥ ९ ॥

हिमागमेऽस्मिन् जडवातदुःसहे दुःस्पर्शतोये भरतो भवानिव ।
सर्वात्मनानुव्रत आर्यमार्यधीर्ध्रुवं जलं सारवमद्य गाहते ॥ १० ॥

किं त्वस्य माता दयिता पितुश्च नः कथं न्वनार्यैवमभूदितीरिते ।
न मातरं गर्हय तं तु तोष्टुहि त्वामित्यशात्तं प्रियबान्धवोऽनुजम् ११

अथाश्रमे राममुपस्थिताशरी सुदुर्भगा वै सुभगेव कामुकी ।
जिहीर्षुरार्यां वितथे मनोरथे निराकृता विप्रयतानुजन्मना ॥ १२ ॥

Digitized by Google

नराभकात्तत्स्वसृवैकृतं विदन् रुषा जनस्थानचरो निशाचरः ।
बलं समस्तं तरसाभिसारयन् खरो रणायाभिससार राघवम् ॥ १३ ॥

ध्वनिं ध्वजिन्या रजनीचरेशितुर्द्रवन्तमाशाध्वनि साध्वसाद्रिपुम् ।
तदानुमायेव हठादवप्लुतो रुरोध तं रामशरासनध्वनिः ॥ १४ ॥

घ्नतोऽपि रक्षांस्यनयो न हि प्रभोर्यद्रक्तरूपा विविधास्तदुत्थिताः ।
युताः सुरीभिश्च पयोधिभिः प्रियाः सर्वं हितायैव महत्समीहितम् १५

बलं निरीक्ष्य स्वभुजावशेषितं खरस्तदा रोषकषायितेक्षणः ।
शरैरमाङ्क्षीद्रघुनाथकार्मुकं पुनस्तथान्यैश्च तनुत्रमच्छिदत् ॥ १६ ॥

रामो गृहीत्वा कवची शरासनं स वैष्णवं ज्यामधिरोपयन् क्षणात् ।
उद्घोषयन्कुण्डलयांबभूव तत्तदा खरस्याप्यभितो लिपिं विधिः ॥ १७

दृष्ट्वा जनस्थानमकण्टकीकृतं रक्षोघ्नमन्त्रं युधि वीरराघवम् ।
अतीव हृष्टा ववृषुस्तथा सुरा यथावचीयेत सुमं सुरद्रुमे ॥ १८ ॥

निशम्य वृत्तं निखिलं स्वसुर्मुखान्निशाचराणामधिपोऽथ रावणः ।
निजघ्नुषः स्वान्सुहृदः प्रतिक्रियां तदीयभार्याहरणं स्म मन्यते १९

मारीचमासाद्य तदर्थमेककस्तपस्यता तेन यथार्हमर्हितः ।
निवेदिताभ्यागमहेतुना भृशं तमेन पथ्यार्थमबोधि रावणः ॥ २० ॥

जिजीविषा चेज्जननीव जानकी संमाननीया दयिता खरद्विषः ।
तथानुभूतं हि मयैव तद्बलं बिभेमि रेफादिपदश्रुतेर्यथा ॥ २१ ॥

तन्मा कृथा दुर्मतिमन्यथा पुनर्न त्वं न चाहं न च रक्षसां कुलम् ।
इत्यादिकं बीजमिवोप्तमूषरे व्यर्थं विदन्हेममृगो बभूव सः ॥ २२ ॥

अवेत्य तस्मिन्हरिणे हिरण्मये प्रियाभिलाषं रघुनायको यदा ।
तमन्वधावीदिषुचापभृत्तदा स्वयं च लब्धावसरः परेतराट् ॥ २३ ॥

Digitized by Google

रामास्ततः पुण्यजनो भवन्नयं त्वाक्रन्द हा जानकि लक्ष्मणेति च ।
कुसृत्मो विष्णुपदं मतोऽपि सन्नहो जगत्यां पतितस्तदाभवत् २४
तदार्तशब्दाकुलयार्ययेरिते गते सुमित्राभुवि राघवान्तिकम् ।
जहार सीतां विजने स रावणो हठाज्जिगीषोरसुभिर्जटायुषः ॥ २५
अथान्यमाक्रन्दमविन्दतीं प्रिया चोक्रुश्यमानां पतिमात्मदैवतम् ।
अतार्किते शोकमहोदधौ प्लुतामशोकमेनामनयोऽनयत्स्वयम् ॥२६
सलक्ष्मणस्त्वाश्रममेत्य राघवो विलोक्य शून्यं दयितां ततस्ततः ।
विचित्य विक्रुश्य विलप्य चासकृन्मुमोह कुत्राप्यनवाप्य तद्गतिम् २७
स लब्धसंज्ञः सहलक्ष्मणो वने चरन् जटायोर्दशया व्रणे हतः ।
तमुत्तमां संस्क्रियया गतिं नयन् कृतानुकारी तद्दणादमुच्यत २८
विदेहपुत्र्या विचिचीषया पुनः प्रतस्थुषोः दक्षिणकाननं तयोः ।
निरुध्य मार्गं निशिचर्ययोमुखी विरूपणाच्छूर्पणखासखी कृता २९
भुजौ कबन्धस्य निकृत्य हिंसकौ तदीयदेहं प्रदरे दहन्विभुः ।
विधूय शापं दिवमारुरुक्षता तेनोपदिष्टां पदवीमशिश्रियत् ॥ ३०

सपर्यां स्वीकुर्वन्नथ पथि शबर्या विरचितां
ससोदर्यो भार्याविरहभृशपर्याकुलमतिः ।
अतीव स्वच्छाम्भः सुरभिवनवातं पिकरवैः
सरः पम्पाभिख्यं विरहिजनकम्पावहमगात् ॥ ३१ ॥

इतिश्रीसुहृसुब्बकविविरचिते संक्षिप्तरामायणे

॥ आरण्यकाण्डः ॥

Digitized by Google

किष्किन्धाकाण्डः

स तां मनोज्ञां सरसीं विलोक्य वसन्तलक्ष्म्या च विशेषरम्याम् ।
प्रियावियोगार्तिमतिप्रवृद्धां सोढुं नशक्तः करुणं व्यलापीत् ॥ १ ॥

प्रियाणि मे यानि पुरा तयासंस्तान्येव जातान्यधुनाप्रियाणि ।
इदं सरोरत्नमिमे वनान्ता अयं च कालः क्व गतासि सीते ॥ २ ॥

निर्विष्टवाँल्लक्ष्मण माधवोऽयं ध्रुवं कणेहत्य वनालिकान्ताम् ।
कुतोऽन्यथास्या नखरक्षतानि ममापि तत्स्याद्यदि सा प्रिया स्यात्

न तापयेदन्यमिति श्रुतं ते नास्तीति मन्ये कलहंस यत्त्वम् ।
प्रियां तवालिङ्ग्य ममाग्रतो मां तद्दुःखदीनं कलुषीकरोषि ॥ ४ ॥

नाहं विषीदामि तथा हृतां त्वामयं तु बाले मम शोकहेतुः ।
विचिन्त्य नित्यं वयसोऽध्रुवत्वं कालं च भोगेन विनैव यान्तम् ॥ ५

विनष्टबन्धुं विलयोन्मुखं मां वामः प्रहृत्यापि न हन्ति कामः ।
मुह्यन्मुहुर्जानकि जानकीति शश्वत्समाश्वास्यत लक्ष्मणेन ॥ ६ ॥

तौ वीक्ष्य वालिप्रहिताविमावित्याशङ्किना सूर्यभुवा निसृष्टः ।
कपिर्हनूमानिति बुद्धिवित्तः पुरस्तयोराह वहन्वटुत्वम् ॥ ७ ॥

नर्षी पुराणौ सशरौ न चेन्द्रोपेन्द्रौ च भूस्पर्शिपदौ युवां स्थः ।
तपस्ययौत्पत्तिकसंपदोर्वा चित्रीयते साध्यविमर्शि चेतः ॥ ८ ॥

शोकं महान्तं हृदि लक्षये वां बाल्येन तन्वेत हि रूपमीदृक् ।
सुग्रीव आकाङ्क्षति वानरेन्द्रः सख्यं भवद्भ्यां यदि रोचते वाम् ॥

इत्थं यथावत्स्वकथां निवेद्य तद्वाक्प्रतिप्रत्ययितो हनूमान् ।
सौमित्रिणाख्याततदीयवृत्तः प्लवङ्गराजा समदीपयत्तौ ॥ १० ॥

उभौ च तुल्यव्यसनाभिभूतौ तावृश्यमूके नरवानरेन्द्रौ ।
वह्निं पुरोधाय मिथो व्यधत्तां मैत्रीं प्रतीकारकृते कृतान्ताम् ॥ ११

देव्यार्पविद्धान्यपहारकाले सुग्रीवलब्धान्यधुनार्पितानि ।
दृष्ट्वानुभूताभरणानि रामे सौमित्रिराश्वासयदार्तरूपम् ॥ १२ ॥

वृत्रारिसूनोरथ दुर्जयत्वं मित्रस्य सूनौ कथयत्यशेषात् ।
सप्तैकबाणेन तरून्विभिद्य प्रत्याययामास रघूद्वहस्तम् ॥ १३ ॥

ततः प्रतीतस्तपनस्य पुत्रः सहैव ताभ्यां स्वपुरीमुपेत्य ।
आह्वास्त स भ्रातरमाहवाय जम्भारिसूनुं जगदेकवीरम् ॥ १४ ॥

प्रधर्षणां वास्यपि तामपूर्वाममृष्यमाणस्तरसाभिपत्य ।
उत्सैकभाजा युयुधेऽनुजेन गन्धद्विपेनेव गजेन्द्रशत्रुः ॥ १५ ॥

आकारचेष्टादिभिरेकरूप्यात्तौ युध्यमानावविविच्य रामे ।
निरुद्यमेऽद्रुद्रवदद्रिमार्किर्बलीयसा द्रागरिणाभिपन्नः ॥ १६ ॥

रामस्त्वपध्यातविधा विहस्तं तूष्णीकमासीनमधोमुखं तम् ।
विश्वास्य तत्त्वोक्तिभिरङ्कयित्वा वल्ल्या नियोद्धुं प्रजिघाय भूयः १७

तस्याभियोगात्पुनराहतः संस्तेजोऽपहारादिव हेममाली ।
निवर्त्य तारामपि सान्त्वयन्तीमक्रुद्ध दिष्टस्य वशेन कृष्टः ॥ १८ ॥

वक्षस्यकस्मात्कृशिकाश्शरेण पतन्पृथिव्यां रुधिराक्तगात्रः ।
प्रशान्ततेजाः प्लवगेश्वरोऽभवत्स्तोन्मुखो भानुरिवोपरक्तः ॥ १९ ॥

क्षणात्स दृष्ट्वा पुरतः सचापं महानुभावं सूर्यसुतानुयातम् ।
अयं प्रहर्तेत्यवधार्य रामं [illegible] चिक्षेप [illegible] ॥ २० ॥

न नाम ते राम [illegible] सधर्म[illegible]मनन्तरं च ।
साक्षं व्यजेष्ठाः [illegible] नैनं मृगव्यारसज्ञः ॥ २१ ॥

उक्ताऽथ रामेण मयाद्य दण्डो भ्रातृद्रुहस्ते विहितो हिताय ।
स्वयाह्यपापस्त्वमिति व्यरंसीत्पारुष्यवादादिव जीविताच्च ॥ २२

आश्वास्य तारामथ वीरपत्नीं संस्कार्य तं तत्तनुजाङ्गदेन ।
तं यौवराज्ये न्यदधात्कपीनां राज्ये च सुग्रीवममोघसंवित् ॥ २३

लब्धास्पदे प्रत्युपकारकाले वर्षान्तमाश्रुत्य गते वयस्ये ।
रामो गिरौ प्रस्रवणे न्यवात्सीत्सहानुजस्तत्समयप्रतीक्षः ॥ २४ ॥

सविद्युतो व्योमनि वारिवाहान्दृष्ट्वा भृशोद्दीपितकामवह्निः ।
चकोर धीरोऽप्यचलास्थितोऽपि विमुक्तकण्ठोऽथ स रोदिति स्म २५

पर्जन्यघोषेण तु यत्र भीरुर्मुहुर्मुहुर्मां परिषस्वजे सा ।
स एव कालो मम वल्लभोऽपि महाप्रियस्यासिनताऽद्य जातः ॥ २६

चन्द्रानने हंसगतेऽम्बुजाक्षि तोयोत्थितोऽञ्जासमेतम्बापिक ।
हा हा जगत्यां समयो मयात्य विजीवमत्र्योऽपि तवाप्यमर्षी ॥ २७

एवं विलपिरपवाह्य वर्षाः कालं व्यतीते बहुशो निराशः ।
स लक्ष्मणं प्रेषयति स्म वत्स कापि कृतघ्नं द्रुतमाहरेति ॥ २८ ॥

तस्मिन्नसह्यमतिथे तथेत्य पुरान्तिकं किंचिदुदञ्चितज्ये ।
क्षुभ्यत्कपीन्द्रप्रहिताथ तारा सौमित्रिमूचे मृदुकोक्तारा ॥ २९ ॥

त्वमेव कामव्यसनानि वेत्सि चत्वारि वा कष्टतमानि तेषु ।
चिरात्तदासाद्य तव प्रसादात्तत्र प्रसक्तो न पुनः प्रमत्तः ॥ ३० ॥

स चाद्य सर्वैः सह यूथनाथैः प्रतीक्षते त्वामिति सान्त्वितेन ।
सौमित्रिणा प्राप्य विभुं कपीन्द्रः सर्वौघमस्मै स्वबलस्य चख्यौ ।
तस्यानुमत्या प्लवगास्तदेत्य सुग्रीवसंदेशमथापहन्तः ।
आशान्तमेत्याप्यनवाप्य सीतामायान्बलाजीगतसैन्यमर्मम् ॥ ३२ ॥

Digitized by Google

तां दक्षिणस्यां दिशि तत्र तत्र विचित्य दैवान्निबिडान्धकारे ।
बिले पतित्वा भ्रमतः कपीन्द्रान्स्वयंप्रभाश्वास्य निनाय वर्त्म ॥ ३३

तान्मर्तुकामान्समयातिपातात्प्रसङ्गविज्ञातजटायुवृत्तः ।
निर्दिश्य पारेऽब्ध्यतिदूरहृत्तां संपातिरुज्जीवयति स्म गृध्रः ॥ ३४ ॥

दुष्पारपारं तरितुं गभीरं भग्नोद्यमेष्वम्बुनिधिं बलेषु ।
ऋक्षाधिपो धीसचिवश्चिरायुरेकान्तसंस्थं हनुमन्तमूचे ॥ ३५ ॥

कस्माद्विमामत्ययिकीं दशां नः पश्यन्नुदास्से जगदेकमल्ल ।
त्वं सूर्यबिम्बं फलधीर्जिघृक्षुर्वज्राहतोऽद्रौ निपतन्हनूमान् ॥ ३६ ॥

त्वं वायुभूस्तत्सदृशश्च कस्मान्न बुध्यसे कुंभजपीततोयम् ।
तत्सागरं गोष्पदवत्तरन्नः प्राणांश्च नः पाहि यशो लभस्व ॥ ३७ ॥

[illegible]
[illegible] कुसुमितभवनक्ता[illegible] ।
वारासं [illegible] वपुरिव [illegible] पुच्छय भीमा[illegible]
पारावारं स रेजे प्रलयचरमहामत्स्यरूपा[illegible] ३८

इति श्रीमुडुम्बकविविरचिते संक्षिप्तरामायणे

॥ किष्किन्धाकाण्डः समाप्तः ॥

सुन्दरकाण्डः

ततो महेन्द्राज्जलधिं तितीर्षुः संस्तभ्य बाहू चरणौ निपीड्य ।
उदग्रकण्ठो हृदि रुद्धवायुः स उत्पपातोर्ध्वमुदीक्षमाणः ॥

प्रचण्डवेगाहृतवृक्षषण्डः प्रसारितोच्चण्डभुजप्रकाण्डः ।
अव्याहतस्वैरगतिर्जगाम धनुश्च्युतो रामशरो यथाऽसौ ॥ २ ॥

Digitized by Google

आपृच्छ्य सान्त्वेन हिरण्यनाभं ह्रस्वोऽतिवृद्धां सुरसामतीत्य ।
छायाकृषं रात्रिचरीं प्रमथ्य सुखं ययौ कपिगणाभिनीतम् ॥ ३ ॥

विशन्निशायां पुरदेवतां स विजित्य मृत्योः प्रथमोपहारम् ।
चन्द्रोज्ज्वलायां निशि तत्र तत्र भूत्वाल्पकायो विचिकाय सीताम् ४

शुद्धान्तगा राक्षसराजकान्ता दृष्ट्वापि निद्राविवशा निशीथे ।
न वैकृतं किंचिदवाप देव्या अदर्शनात्तु व्यथितो महात्मा ॥ ५ ॥

यदृच्छयाशोकवनीं प्रविश्य प्रसार्य सर्वत्र दृशं तरुस्थः ।
ददर्श सीतां मलिनैकवस्त्रां तपस्विनीं पङ्कविदिग्धगात्राम् ॥ ६ ॥

ऊष्मायमाणश्वसितोपरक्तां बाष्पायमाणाक्षिजलाविलास्याम् ।
महोपवासव्रतकर्शितासुं रामास्थया केवलमप्रणष्टाम् ॥ ७ ॥

तामेकपत्नीं जनकात्मजेति प्रसन्नधीर्हेतुभिरूहमानः ।
रामो विपन्नामपि जीवतीति सुदुष्करं वा इदमित्यमंस्त ॥ ८ ॥

अत्रान्तरे रावणमापतन्तं स्मरातुरं संवृतमङ्गनाभिः ।
विलोक्य भीता कदलीव वाते दुःखासिकामाप विदेहपुत्री ॥ ९ ॥

तस्याः समक्षं पतिदेवतायाः स क्षुद्रबुद्धिः प्रललाप पापः ।
दृष्ट्वैव किं मां त्वयि सानुरागं बिभेषि जिह्रेषि विलीयसेऽङ्गे ॥ १०

न तेऽस्ति शोकावसरोऽद्य भीरु सर्वेश्वरे मय्यपि दासभूते ।
यातं न चायास्यति यौवनं ते स्नेहानुवृत्तिर्निहिता न मन्ये ॥

स तापसस्त्वद्विरहाद्वनान्ते मृतो हतो वा युधि यातुधानैः ।
समुद्रमासाद्य च किं करोतु प्रसीद शुष्काद्रिरिवाभिलाषात् ॥ १२ ॥

प्रिये त्यजेयं मम जीवितान्तं सर्वं त्वदर्थं यदि मन्यसे त्वम् ।
इत्याद्यनार्यं प्रलपन्तमग्रे तृणं विनिक्षिप्य जगाद साध्वी ॥ १३ ॥

Digitized by Google

कुलं कलङ्कितं च काकुत्स्थमार्गं न कथं लज्जसे त्वं परदारचोर ।
स्मृत्वा जनस्थानगतान्खरादीन्धूमध्वजे चैव प्रामर्षय लोकनाथे ॥ १४ ॥

स हि प्रपन्नं शरणं शरण्यः प्रसादयिष्यति त्वद्यपि दीनबन्धुः ।
त्वरस्व तावच्छरणं प्रपन्नाः कुले कुले ते न मरन्ति यावत् ॥ १५ ॥

पथ्यावमत्याशु तदुक्तिमेनां वश्यां कुरुध्वं सकलैरुपायैः ।
इति ब्रुवाणो दिवसं निशाचरीः स पद्मपत्रेऽर्थगतिर्निशान्ते ॥ १६

ततो भृशं तर्जनभर्त्सनाद्यैस्तां क्लेशयन्तीं रजनीचरीस्ताः ।
रक्षःकुलानर्थमहत्प्रमादं दुःस्वप्नमुक्त्वा त्रिजटा रुरोध ॥ १७ ॥

सा सान्त्वितापि प्रतिकूलभर्तुरात्मत्यागाय बाला कृतनिश्चयाथ ।
दृष्ट्वा निमित्तानि शुभानि पूर्वं शिवानि किंचित्प्रापितमन्तरे ॥ १८ ॥

तस्मिन्क्षणे कीर्तितसूर्यवंशः शनैः शनैः प्रत्ययितां स देवीं ।
प्रणम्य वृत्तं निखिलं निवेद्य समर्पयामास च राममुद्राम् ॥ १९ ॥

तां दृष्टरूपां कपिराजगामी रामान्तिकं त्वामिति तर्कयित्वा ।
वाचं शरीरं च तदा प्रवक्ता द्वयं च संकोच्य पुनर्जगाद ॥ २० ॥

स्थाने तवेदं रघुवीरपत्नि कर्ता प्रियं ते प्रभुरेव सैन्यैः ।
त्वद्देव्यभिज्ञानमवाप्य किंचिद्विश्रामान्तिकमत्र त्वरते मनो मे ॥ २१ ॥

चूडामणिं प्राप्य ततो हनूमान्वाराशरानुग्रहसान्त्विकं च ।
देवीमनुज्ञाप्य निविक्तसेवी ह्यचिन्तयत्संस्कृतधीः कृतार्थः ॥ २२ ॥

दृष्टाद्य देवी न पुनः स्विधोत्तद्बलाद्यमस्यं विजिगीषुवेद्यम् ।
तत्साधनं दुर्गमुपायमत्र मन्ये प्रमथ्नामि वनं तदेतत् ॥ २३ ॥

एवं विनिश्चित्य वनं प्रभज्य प्रभञ्जनी राक्षसराजमुख्यान् ।
निजघ्निवान् किंकरजम्बुमालिसेनाधिपांस्तत्तनयं च सोऽक्षम् २४ ॥

Digitized by Google

अन्तर्हिते शक्रजिता प्रयुक्ते [illegible] कपिकुञ्जरोऽसौ ।
रक्षोभिराकृष्य स नीयमानो ददर्श [illegible] ॥ २५ ॥

दशाननं विंशतिबाहुभीमं [illegible] ।
सुराङ्गनाचामरवीज्यमानं [illegible] सुरलोकशत्रुम् ॥ २६ ॥

तं तेजसा दीप्तमवेक्ष्य मेने [illegible] महाकर्मा ।
अयं स ईष्टे ससुरासुरस्य [illegible] चेति ॥ २७ ॥

सोऽपि प्लवङ्गं द्रुतहेमवर्णं पिङ्गेक्षणं [illegible] ।
महाहनुं वज्रतनुं प्रगल्भं दृष्ट्वा [illegible] विस्मये च ॥ २८ ॥

पृष्टः प्रहस्तेन ततो हनूमानकातरं प्राह वचो हितं च ।
मां विद्धि दूतं रघुनायकस्य वार्धिं [illegible] हैहयशत्रुजेतुः ॥ २९ ॥

रामस्य मित्रं कपिचक्रवर्ती त्वां शास्ति रक्षोऽधिप मन्मुखेन ।
स्त्रीचोर [illegible] स्थितिर्[illegible] तव दुर्लभेति ॥३०॥

क्रुधा वधायाप्रियवादिनोऽस्य [illegible] रावणमग्रजातम् ।
न क्वापि दूतो वधमर्हतीति विभीषणो धर्म्यमतिर्न्यषेधीत् ॥ ३१ ॥

ततो निवृत्तः स च वानराणां प्रियं हि पुच्छं तदयं दुरात्मा ।
कृशानुना तत्र विरूप्यतामित्य[illegible] रक्षांसि तथा चकार ॥ ३२ ॥

मित्रस्य पुत्रं दहनोऽपि [illegible] ।
पितुः सखायं पितृवद्विभूषां सोऽपि [illegible] ॥ ३३ ॥

तदग्निसात्कृत्य पुरं समस्तं [illegible] ।
देवीमनुज्ञाप्य पुनश्च वीरः [illegible] कृतार्थः ॥ ३४ ॥

आयान्तमाक्रम्य दिवं च सिन्धुं [illegible] ।
तं रत्नसानुप्रतिमं निरीक्ष्य [illegible] ॥ ३५

कुलं क्व शीलं क्व च वाक्कुमार्गं न लज्जसे त्वं परदारचोर ।
स्पृष्ट्वा जगन्मातरमस्तकं धुनुषेव मामर्पय लोकनाथे ॥ १४ ॥

स हि प्रपन्नं शरणं शरण्यः प्रसत्स्यति त्वय्यपि दीनबन्धुः ।
त्वरस्व तावत्कुमतिप्रवाप्तः कुले कुले ते न चरन्ति यावत् ॥ १५ ॥

पथ्यामतत्कृत्य तनुसिंहमेतां वश्यां कुरुध्वं सकलैरुपायैः ।
इति क्रुधादिश्य निशाचरीः स यथागतं नैर्ऋतपतिर्निशान्ते ॥ १६

ततो भृशं तर्जनभर्त्सनाद्यैस्तां क्लेशयन्तीः रजनीचरीस्ताः ।
रक्षःकुलध्वंसनमात्मदृष्टं दुःस्वप्नमुक्त्वा त्रिजटा रुरोध ॥ १७ ॥

सा सान्त्विताप्युत्कटमन्युरात्मत्यागाय बाला कृतनिश्चयाथ ।
दृष्ट्वा निमित्तानि शुभानि पूर्वं शिवानि किंचिद्धर्षितान्तरात्मा ॥ १८ ॥

तस्मिन्क्षणे कीर्तितसूर्यवंशः शनैः शनैः प्रत्ययितां स देवीं ।
प्रणम्य वृत्तं निखिलं निवेद्य समर्पयामास च राममुद्राम् ॥ १९ ॥

तां हृष्टरूपां कपिरानयामि रामान्तिकं त्वामिति वर्णयित्वा ।
वाचं शरीरं च तया प्रशस्तो द्वयं च संकोच्य पुनर्बभाषे ॥ २० ॥

स्थाने तवेदं रघुवीरपत्नि कर्ता प्रियं ते प्रभुरेष सैन्यैः ।
त्वद्दैन्यविज्ञानमवाप्य किंचिद्रामान्तिकाय त्वरते मनो मे ॥ २१ ॥

चूडामणिं प्राप्य ततो हनूमान्प्राणेश्वरानुग्रहवाचिकं च ।
देवीमनुज्ञाप्य विनिर्गतोऽसावथाचिन्तयत्संस्कृतधीः कृतार्थः ॥ २२ ॥

दृष्टाद्य देवी न पुना रिपोस्तद्बलाद्यमस्यं विजिगीषुणेयम् ।
तत्साधनं दुर्लभमत्र मन्ये प्रमथ्नामि वनं तदेतत् ॥ २३ ॥

एवं विनिश्चित्य वनं प्रभञ्जन्प्रभञ्जनो राक्षसराजमुख्यान् ।
निजघ्निवान् किंकरजम्बुमालिसेनाधिपांस्तत्तनयं च सोऽक्षम् २४ ॥

अन्तर्हिते शक्रजिता प्रयुक्ते तेन महास्त्रे बद्धसूक्ष्मकपौ ।
रक्षोभिराकृष्य स नीयमानो ददर्श तं राक्षसराजमेनम् ॥ २५ ॥

दशाननं विंशतिबाहुभीमं चतुष्पदं मघवत्प्रतिनीकम् ।
सुराङ्गनाचामरवीज्यमानं महासनस्थं सुरलोकशत्रुम् ॥ २६ ॥

तं तेजसा दीप्तमवेक्ष्य मेने न चेत्कृपोदार्य महाकर्मा ।
अयं स ईष्टे ससुरासुरस्य सचराचरस्यैव लोकस्यापि चेति ॥ २७ ॥

सोऽपि प्लवङ्गं द्रुतहेमवर्णं पिङ्गेक्षणं विद्रुमताम्रवक्त्रम् ।
महाहनुं वज्रतनुं प्रगल्भं दृष्ट्वाशशङ्के न विसिष्मये च ॥ २८ ॥

पृष्टः प्रहस्तेन ततो हनूमानकातरं प्राह वचो हितं च ।
मां विद्धि दूतं रघुनायकस्य वालिद्विषो हैहयशत्रुजेतुः ॥ २९ ॥

रामस्य मित्रं कपिचक्रवर्ती त्वां शास्ति रक्षोऽधिप मन्मुखेन ।
स्त्रीचोर लोपत्रस्तमपातयित्वा स्थितिर्जनस्यास्य तव दुर्लभेति ॥ ३० ॥

क्रुधा वधायाप्रियवादिनोऽस्य समुद्यतं रावणमग्रजातम् ।
न क्वापि दूतो वधमर्हतीति विभीषणो धर्म्यमतिर्न्यषेधीत् ॥ ३१ ॥

ततो निवृत्तः सच वानराणां प्रियं हि पुच्छं तदयं दुरात्मा ।
कृशानुना तत्र विरूप्यतामित्यवदत्स रक्षांसि तथा चकार ॥ ३२ ॥

मित्रस्य पुत्रं दहनोऽपि बाले रक्तस्समासः सुतवत्पुपोष ।
पितुः सखायं पितृवद्विभूषां सोऽपि प्रवीरः सदनैस्तार्पीत् ॥ ३३ ॥

तदग्निसात्कृत्य पुरं समस्तं बलैकशेषं च रिपोः प्रमथ्य ।
देवीमनुज्ञाप्य पुनश्च वीरः प्रतिप्रतस्थे प्रभुकृत्यकृतार्थः ॥ ३४ ॥

आयान्तमाक्रम्य दिवं च सिन्धुं महौजसं मेघमिवस्तमेवम् ।
तं रत्नसानुप्रतिमं निरीक्ष्य मेना इवार्का कपयोऽभ्यनन्दन् ॥ ३५

दृष्टा मया राघवधर्मपत्नीत्युक्त्वा वनं हनुमत्युपेते ।
उत्प्लुत्य चोत्प्लुत्य मुदा कपीन्द्रा आस्फोट्य पुच्छं च मुहुश्चुचुम्बुः
संप्रस्थिता वर्त्मनि राजकीयं वनं हनूमद्वचनात्प्रधर्ष्य ।
स्वैरं पिबन्तो मधु ते प्रसह्य तद्रक्षकान्विप्रकृतीर्निजघ्नुः ॥ ३७ ॥
अतिक्रमे तैः कपिभिः कृते तेषां निवेदितं सोऽप्यनुमाय धीमान् ।
तैरेव सर्वानपि वानरेन्द्र आनाययामास कपीन्दिदृक्षुः ॥ ३८ ॥
सर्वैर्हनूमान् कपियूथनाथैरनुद्रुतोऽभ्येत्य विभुं प्रणम्य ।
दृष्टा मया सेति निवेद्य चूडामणिं च दत्त्वा पुनराबभाषे ॥ ३९ ॥

त्वत्प्राणां त्वन्मनस्कां तव हि सुजनवत्प्रत्ययाद्भाग्यशिष्टां
क्षामक्षामाङ्गयष्टिं शिशिरमरुतिना क्लिश्यमानां दुरुक्तैः ।
रक्षःस्त्रीबाध्यमानां तनुपरिहरणेऽप्युद्यतां मुद्रया ते
प्रत्याश्वस्तां कथंचिन्नृवर दयितामीप्स मानसतीक्षाम् ४०

इति श्रीमुद्दुसुब्बकविविरचिते संक्षिप्तरामायणे

॥ सुन्दरकाण्डः ॥

युद्धकाण्डः

श्रुत्वा प्रियाप्रियतरं चरितं प्रियाया
दण्डैकसाध्यमवगत्य रिपुं च रुष्टः ।
षाड्गुण्यविद्रघुपतिर्विजिगीषमाणः
संपूर्णशक्तिरभिषेणयितुं प्रतस्थे ॥ १ ॥
आरुह्य वायुसुतमक्रममप्यवाच्यां
बह्वीः कठोरतनुमानटवीरतीत्य ।

Digitized by Google

आसाद्य सिन्धुमुपशान्तजवां निवेश्य
सेनां च तत्र वसतः स्म कपीश्वरेण ॥ २ ॥

ज्ञात्वा द्वितीयमिव सागरमम्बुराशेः
पारे प्लवङ्गमबलं कृतसंनिवेशम् ।
दिक्पालदर्पनिकषायितविक्रमोऽपि
रक्षःपतिर्मयदवेन भृशं दिदीपे ॥ ३ ॥

आमन्त्र्य सोऽथ सचिवांश्चकितः प्रहस्त-
मुख्यान्मिथः समनुमानमिदं बभाषे ।
राजावरोप्य सचिवे स्वधुरामुदास्ते
व्यापारम[illegible] मुनिमोऽस्य हि मन्त्रभेदः ॥ ४ ॥

तस्मान्न मे[illegible]भरस्य भवत्सु चिन्ता
मन्त्रं तथापि [illegible] कुशलात्मनीनम् ।
न स्याद्यथा परिभवो[illegible]रेभ्यः
क्षुद्रोऽपि [illegible]मुपेक्षणीयः ॥ ५ ॥

मर्त्यप्लवंगमपि ते यदि भीस्तथापि
कैलाससमुद्धृतवतो जगतां विजेतुः ।
को वा भयोऽस्त्वपि न तव मनुष्यकीट-
दृश्यानुपूर्वकशया तव विस्मयो नः ॥ ६ ॥

यच्चापि मर्कटविचेष्टितमत्र तत्तु
नोत्प्रेक्ष्यम[illegible]नमूलकत्वात् ।
तस्मान्नियुज्य मम [illegible]पेऽस्मान्
स्वैरं रमस्व [illegible] तथेति ॥ ७ ॥

दुर्मन्त्रितं तदहितं हितवाक्यबुद्धि-
संपादि राक्षसपतावनुमोदमाने ।
आन्वीक्षकीकृतमतिर्नयविद्धितैषी
भ्राता विभीषण इदं समुदाजहार ॥ ८ ॥
नार्हन्त्यमी अकुशलास्तव मन्त्रगोष्ठीं
कुर्यान्न वापि मतिमान्गुरुलाघवज्ञः ।
किं वा भवेल्लघुतरं परदारचौर्या-
त्किं वा स्वदारपरिरक्षणतो गरीयः ॥ ९ ॥
शूरः स्वयं नृपसुतः [illegible]
सानुज[illegible]
स्थातुं त्वया [illegible]
प्रत्यर्प्य [illegible] वेसत ॥ १० ॥
इत्थं निवेद्य कुपितेन तदग्रजेन
निष्कासितोऽम्बुधिमतीत्य ततोऽपरस्मिन् ।
आक्रन्दति स्म [illegible] स दिविष्ठ उच्चै-
रापन्नबन्धुमभयाय रघुप्रवीरम् ॥ ११ ॥
आकर्ण्य [illegible]
शङ्काकुलेऽपि मतिविक्रमवान्कपीन्द्रे ।
पर्यग्रहीत्स्वजनवाद्रिपुसोदरं स
नोच्चेर्हदा स्वपरधीः शरणं प्रपन्ने ॥ १२ ॥
लङ्काधिपत्यमधिगत्य ततः कनीयान्
रक्षोधिपो रिपुवध [illegible] निमेष ।

आराधनाय वरुणस्य तरीतुमब्धिं
रामस्य दर्भशयनीयमकल्पयत्सः ॥ १३ ॥

तत्र त्रिरात्रमधिपे प्रतिपाल्य बाणै-
स्तम्बत्यमाद्दररुषा क्वथितं पयोधिम् ।
अभ्याजगाम वरुणः शरणं शरण्यं
दण्डो हि साधकतमः स्तिमितान्विनेतुम् ॥ १४ ॥

तस्मिन्प्रसाद्य कुपितं गमनेऽप्युपाय-
मुक्त्वा प्रचेतसि गतेऽथ कपिर्नलाख्यः ।
सेतुं बबन्ध जलधौ प्लवगोपनीतैः
पारिप्लवैर्वरबलेन नगैर्विशालम् ॥ १५ ॥

तद्वर्त्मनाद्भुततमेन विभुः समुद्रं
तीर्त्वा सुवेलकटके बहुपानभोज्ये ।
सेनां निवेश्य महतीं स यथोपनोष-
मासांबभूव दिविषद्गणगीतकीर्तिः ॥ १६ ॥

जिज्ञासया परबलस्य दशास्यमुक्ता-
वादाय वानरतनुं शिबिरे चरन्तौ ।
मायाचणौ निशिचरौ सचिवैर्निगृह्य
रामान्तिकं स तु विभीषण आनिनाय ॥ १७ ॥

तावाशरौ कपिकुलैर्भृशमर्द्यमाना-
वुन्मुच्य दर्शितबलौ विभुना विमुक्तौ ।
स्वस्वामिनो धुरि शशंसतुरानृशंस्यं
रामस्य दुःसहतरं कपिविक्रमं च ॥ १८ ॥

चारौ परस्तवपरौ शुकसारणौ तौ
निर्भर्त्स्य राक्षसपतिस्त्ववरुह्य सौधात् ।
मायाविनां प्रथममादिशति स्म विद्यु-
ज्जिह्वं शठश्छलयितुं जनकेन्द्रपुत्रीम् ॥ १९ ॥

सोऽपीन्दुवक्त्रमरुणान्तकटाक्षमीष-
च्चूडामणिप्रवरशोभिशिखाकलापम् ।
मायी विलूनमिव रामशिरः प्रदर्श्य
देवीममूमुहदनन्यगतिं भृशार्ताम् ॥ २० ॥

शोकाप्लुता सरमया हितया सख्या
मायेयमाशरकृतेत्युपपादयन्त्या ।
सा जानकी स्वयमभूदुपनीततापा
वृष्ट्या यथा वसुमती मिहिराभितप्ता ॥ २१ ॥

मातामहः पलभुजां हितकृन्मनीषी
तं माल्यवान् रहसि रावणमाह वृद्धः ।
यः संधिविग्रहविधिं विधिवद्धि वित्ते
शास्ति स्वयं वसुमतीं स महेन्द्रधर्मा ॥ २२ ॥

केमौ नरौ क्व कपयः क्व पुनः पुरीयं
दग्धैकमर्कटकणेन सुतो हतस्ते ।
भ्राता च तेऽतिबलवान्परपक्षसेवी
क्षिप्ताः शिलाश्च हरिभिर्जलधौ प्लवन्ते ॥ २३ ॥

मन्ये तदद्य नियतिस्त्वयि तात वामा
नालं सुरैरपि बलादतिवर्तितुं सा ।

Digitized by Google

नारी परत्रहृदया च न पुष्कलोऽर्थो
विद्राव्य तां सुखय वत्स चिरायुरस्मान् ॥ २४ ॥
वृद्धप्रलाप इति तन्मतिमप्यपास्य
लङ्केश्वरः पुरि चतुर्ष्वपि गोपुरेषु ।
रक्षां विधाय महता बलवद्बलेन
प्राज्यागरीत्कलुषितो बलिनोऽभियोगात् ॥ २५ ॥
व्यूढां सुवेलकटके पृतनां प्रधानै-
र्गुप्तां दृढं विदधता कपिपुङ्गवेन ।
रामोऽधिरुह्य शिखरं रिपुराजधानी-
मैक्षिष्ट चाक्षुषमहोदयराजधानीम् ॥ २६ ॥
उद्वीक्ष्य गोपुरगतं कपिराड् दशास्य
दिष्ट्यासि धूर्त मम दृक्पथ आततायिन् ।
आः पातकिस्तव पिनष्म्यधुनेति चेतः-
संपातवानपतदस्य शिरःस्वमर्षात् ॥ २७ ॥
अन्योन्यघट्टनविकर्षणमुष्टिकुट्ट-
प्रोत्क्षेपभञ्जनचपेटनखप्रहारैः ।
भूमौ निपात्य सहसाङ्घ्रिप्रहारकौ तौ
द्वन्द्वं वितेनतुरुभौ कपिराक्षसेन्द्रौ ॥ २८ ॥
तं रामवध्यमवधार्य स वञ्चयित्वा
प्रत्यागतः कपिवरो विभुनानुशिष्टः ।
नैतत्समञ्जसमितश्च तथा न कार्यं
मित्र त्वया न किमपि त्वदृते ममेति ॥ २९ ॥
जिज्ञासुना रिपुमतं रघुनायकेन
मुक्तोऽथ वालितनयः प्रविलङ्घ्य सालम् ।

Digitized by Google

आसाद्य रावणमकार्यनिविष्टबुद्धिं
 प्राज्ञो गभीरमवदद्धितमप्रियं च ॥ ३० ॥
चीर्णं तपश्चिरतरं चरिताश्च धर्मा
 विद्याः कृता अधिगतं महदीश्वरत्वम् ।
नीचाशयो निखिललोकपदे निहंसि
 क्लेशाय केवलममीषु परिश्रमस्ते ॥ ३१ ॥
मन्येऽनुमोक्ष्यस इमां रघुराजपत्नीं
 सिंहीमलर्क इव वच्मि वयस्यभावात् ।
तामर्पयाशु तव मूर्धसु कङ्कपत्री
 श्यामप्रकाममुखरा निपतेन्न यावत् ॥ ३२ ॥
अग्निर्दहेद्गुरुतरार्णवमेव सा तु
 कुर्वीत मत्कुमपि शान्तिकुपितस्य तस्य ।
योधान्स्वनिग्रहपरान्स निनाय देवं
 वैवस्वतं पितृपतिं च मतिं पितृव्यम् ॥ ३३ ॥
संग्रामप्रमदजुषामथोऽन्येषां
 संनाहोद्भटभटकोटिसंभ्रमाभाः ।
स्वच्छन्दं पटुपटहा हरिस्तु सुतान्
 हर्यक्षानपि जनु मोचयांबभूवुः ॥ ३४ ॥
आधून्वत्पटरथकेतुदण्डदम्भा-
 दाहूताः समरभुवा करैरिव स्वैः ।
आतङ्काद्भुतभयकौतुकप्रवादै-
 रातेनुर्दिवि निबिडस्थितिं निलिम्पाः ॥ ३५ ॥
क्षुन्दानाः खरनखदन्तकुन्तमुष्टि-
 प्रासादिप्रहरणभिन्नमूलदेशान् ।

Digitized by Google

प्राकारान् गिरितरुभिश्च पूरयन्तो
दुर्गाणि प्रविविशुरोजसा कपीन्द्राः ॥ ३६ ॥
क्षोणीध्रान्क्षिपत रथान्भनक्त पक्षा-
न्वश्वानां प्रहरत हारिणश्च पिङ्ग ।
योधांश्च क्षपयत वानरप्रवीराः
स्वच्छन्दं निशिचरसाहिभिर्नि भग्नाः ॥ ३७ ॥
भग्नं स्वं बलमखिलं प्रहस्तमुख्यं
विज्ञाय प्रकुपित इन्द्रजिन्निशीथे ।
आसारैर्द्रुततरमाशरः स्वसूणा-
मातेने कपिकुलमाकुलं सनीकम् ॥ ३८ ॥
उत्पाट्य क्षितिरुहमुन्नतं कराभ्यां
विक्रम्यानिलगतिरङ्गदः प्रकृत्य ।
प्रध्वस्तप्रधियुगकूबराक्षयुग्यं
संक्षुण्णं व्यतनुत शात्रवं रथाङ्गम् ॥ ३९ ॥
उज्झित्वा रथमथ मायया विलीनो
मेघेषु प्रथितबलः स मेघनादः ।
कीशौघं भुवि निशितेन सायकैस्ता-
नामास्त्रैर्दशरथनन्दनावबध्नात् ॥ ४० ॥
तौ बद्धौ भुजगशरैर्दृढं विचेष्टौ
निःसंज्ञौ भुवि पतितौ यदा तदेदम् ।
त्रैलोक्यं व्यथितमपेतसत्त्वमासी-
त्क्षेत्रज्ञव्यपगमने यथैव चैत्यम् ॥ ४१ ॥
संत्रस्ता रणभुवमेत्य तत्र सीता
संदृष्टाशरपतितौतपुष्पकेण ।

तौ दृष्ट्वा स्वयमपि दुर्मनायमाना
मोहाब्धावहह मुहुर्मुहुर्ममज्ज ॥ ४२ ॥
सौवर्णाचलरुचिरप्रभः सुपर्ण-
स्त्रय्यात्मा त्रिदशवरध्वजोऽहिशत्रुः ।
विस्तारस्थगितदिगन्तपक्षवात-
व्याधूताद्रिरसनबन्ध आविरासीत् ॥ ४३ ॥
पाणिभ्यां वपुषि परामृशञ्छिवाभ्यां
संरूढव्रणसुदृढाङ्गकौ विधाय ।
आश्वास्य प्रियवचनैर्नरेन्द्रपुत्रौ
तार्क्ष्योऽगात्पुनरपि नित्यमङ्गलात्मा ॥ ४४ ॥
विध्वस्ते विषधरशस्त्रजोपसर्गे
वैदेह्या अशुभमुचा शुचा सहैव ।
उत्तस्थुः पुनरपि वानराः प्रहर्तुं
शत्रूणां हृदयविकम्पनैर्निनादैः ॥ ४५ ॥
संमर्दे दिनकरपुत्रयोधवर्गैः
संचूर्णीकृततनवो निशाटवीराः ।
सूर्यस्य प्रतिकृतिकाम्ययेव बिम्बं
भिन्दाना दिवमथ सहस्रशः प्रयाताः ॥ ४६ ॥
धूम्राक्षं कपिभिरकम्पनप्रहस्तौ
द्वाःस्थास्तान्युधि निहतान्सवज्रदंष्ट्रान् ।
आकर्ण्य क्षुभितमतिः स्वयं महत्या
वाहिन्या समरमवाप राक्षसेन्द्रः ॥ ४७ ॥
आगच्छन्दशवदनः स्ववक्त्रसंख्या-
संघर्षादिव पिदधद्दिशो दशास्त्रैः ।

Digitized by Google

मन्थानाचल इव सागरं कपीनां
संक्रुद्धो बलमतिविह्वलं व्यतानीत् ॥ ४८ ॥
सुग्रीवाङ्गदनलनीलमुख्यवीरान्
कृत्वासौ निशितशरैः स्वतूणभूतान् ।
संघट्टे दृढतरमुष्टिरक्षशत्रुं
संरब्धो व्यतनुत घूर्णमानमङ्गैः ॥ ४९ ॥
सौमित्रिं निजशितशक्तिवेधमूर्छं
नोद्धर्तुं धृतगिरिरप्यसौ शशाक ।
तां विश्वंभरभरधारणेऽप्यतीवः
द्रोणां स्वां प्रकृतिमुपेयिवांसमन्तः ॥ ५० ॥
आश्वस्य श्वसनसुतेन वज्रकल्पं
मुष्टिं वै विरचयता हतः स्तनान्ते ।
स्रोतोभी रुधिरमसृक्प्रसार्वभौमः
सिन्दूरद्रवमिव धातुमानवर्षीत् ॥ ५१ ॥
अस्वस्थं स्वयमपनीय जन्यभूमे-
रामानां लघुमथ लक्ष्मणं हनूमान् ।
उल्लाघं सपदि विधाय तं युयुत्सो
रामस्य द्रुततरमन्तिकं बभाज ॥ ५२ ॥
सोऽप्येतं तरलितकीशयूथनाथं
विश्रान्तं पुनरभियान्तमाहवाय ।
संक्रुद्धः पवनसुतं रथं विलम्ब-
भूजस्वी प्रतियुयुधे रिपुं तरस्वी ॥ ५३ ॥
तौ दृष्ट्वा दृढतरकार्मुकौ कृतास्त्रौ
सामर्षौ शरनिकरान्मिथः किरन्तौ ।

आक्रन्दक्षमभुजविक्रमौ त्रिलोक्या
द्वैधोढं हृदयमभूद्विक्षकाणाम् ॥ ९४ ॥
अस्त्राणि प्रतिरथसंहितानि सद्यः
प्रत्यस्त्रैः समुपशमय्य लाघवेन ।
विध्यन्तौ स्वयमरिमन्तरान्तरा ता-
वन्योन्याद्भुततममाहवं व्यधत्ताम् ॥ ९५ ॥
नाराचैरथ रथसूतवाहतूणी-
चापोरश्छदमकुटान्यरेर्विभिन्दन् ।
ऐक्ष्वाको निजभुजशेषमात्तगन्धं
मन्दाक्षव्यतिकरविह्वलाक्षमूचे ॥ ९६ ॥
मा भैषीर्निशिचर विक्षतं विशस्त्रं
नो हन्यां यदपि भवान्ममाशु वध्यः ।
श्वस्त्वायन्नुपकरणैः पुनः समग्रो
द्रष्टासि त्वदरिबलं युयुत्ससे चेत् ॥ ९७ ॥
सावज्ञं बलवदरातिनैवमुक्त्वा
निर्मुक्तो मृगपतिनेव गन्धहस्ती ।
रक्षोराड् भवनगतो दुरन्तचिन्ता-
संतापव्यथितमना न शर्म लेभे ॥ ९८ ॥
संदंशार्पितमिव रामकामबाण-
व्यालोलान्तरममुमब्रुवन्नमात्याः ।
प्रागग्र्यं शमयतु देव कुम्भकर्णो
बाधं सा चरममुपस्थिता स्वयं त्वाम् ॥ ९९ ॥
मत्वा तद्धितमनुजं महान्धकारे
निद्रार्णवे पतितमबोधयद्भटैः सः ।

उद्बुद्धः स च नितरामनर्थमूले
कामाख्ये दशमुखमग्रजं हितोक्त्या ॥ १० ॥
प्रक्रम्य प्रसभमवीक्ष्य चानुबन्धं
पश्चाद्यो विमृशति तत्फले प्रसक्ते ।
मन्दात्मा स्वकृतमवाप्य जीवनाशं
नश्येद्वै सपदि स कर्कटीव गर्भात् ॥ ११ ॥
शीलस्थां परगृहिणीं हरन्नकामां
स्वायत्तं हितमनुजं प्रियं निरस्यन् ।
त्वन्नाथं बलमुपहारयंश्च मृत्योः
प्राज्ञस्त्वं किमिति न बुद्ध्यसेऽपनीतिम् ॥ १२ ॥
न श्रेयः कथमपि पारदारिकाणा-
मित्यत्र त्वमिह निदर्शनाय मा भूः ।
उक्त्वैवं कुपितमवेक्ष्य राक्षसेन्द्रं
सर्वं ते हतमिति जन्यमाविवेश ॥ १३ ॥
तेनैके युधि निहताश्च पादघातं
निष्पिष्टाः कतिचन तत्र चूर्णपेषम् ।
संभग्नाः क्वचिदपरे मृणालभङ्गं
शेषाश्चाप्यपगमितास्ततः कपीन्द्राः ॥ १४ ॥
धावन्तो दिशि दिशि तत्र वीक्ष्य शैलान्
भीतास्ते मृशामिव कुम्भकर्णबुद्ध्या ।
व्यावृत्ताः पुनरपि तं विलोक्य साक्षा-
द्धोलास्था इव कपयश्चिरं विचेलुः ॥ १५ ॥
तैर्भूयोऽङ्गदवचसोद्यता गिरीन्द्राः
संघट्टं तदुरसि वज्रसार एत्य ।

Digitized by Google

चूर्णत्वं सपदि गता बलाधिकेन
 व्यावृण्वन् किल सहयुध्वनो विप्रतिम् ॥ ६६ ॥
आच्छिद्य ग्रहणगते गते स्वनासां
 सुग्रीवे रघुपतिना चिरं स युद्धः
तां निद्रामतिदयितां सुदीर्घदीर्घां
 दुर्बोधां पुनरयति स्म कुम्भकर्णः ॥ ६७ ॥
तद्विज्ञाय व्यथितमनसो राक्षसेन्द्रस्य पुत्रा
 वीर्योत्सिक्ताः समरसरणिं प्राप्य देवान्तकाद्याः ।
चत्वारस्ते पवनजमुखैः स्थाममक्षस्य नीता
 भ्रातृस्नेहादिव विरहितां पञ्चतामभ्यसेयुः ॥ ६८ ॥
आश्वास्यार्तं पितरमनलं तर्पयित्वाभिचारे
 लीनो मेघे कपिपरिबृढाञ्छातयन्बाणवर्षैः ।
ब्रह्मास्त्रेण त्रिजगदगदंकारवीर्यौ विहिंसन्
 काकुत्स्थौ च स्वपुरमगमद्धृष्टधीर्मेघनादः ॥ ६९॥ ॥
ओषध्यद्रौ पवनजहृते वानराणां हतानां
 नाजीवन्कोऽप्यथ पलभुजां तत्र नैकोऽपि जीवन् ।
ते यत्क्षिप्ताः सपदि जलधौ ये हता यातुधाना
 भाग्यायत्ता ह्यपि मतिमतां धीरुदर्कानुरूपा ॥ ७० ॥
स्वस्थैः पश्चान्निशि कपिभटैरुल्कयोद्दीप्य लङ्कां
 नीतेष्वद्धा पितृपतिपुरं षट्सु कुम्भादिकेषु ।
रामश्चक्रे युधि खरसुतं तत्समीपोपयातं
 विद्वान्को वान्यथयति पितापुत्रविश्लेषदुःखम् ॥ ७१ ॥
भूयश्छन्ने व्यथयति रिपौ लक्ष्मणोऽथ त्रिलोकीं
 नीरक्षस्कां कलयितुमना राघवेण न्यषेधि ।

इत्येकस्मिन्नपि च मनसोऽनागसो नैव वध्या
जातौ किं धीगुणनिपुणगा सज्जते सज्जनानाम् ॥ ७२
सोऽपक्रान्तो भुवि हनुमतो मायया दर्शयित्वा
मूर्ध्नि च्छिन्नामिव जनकजां मोहयित्वा च सर्वान् ।
प्रक्रम्येष्टिं जगदपकरीं तां पितृव्योपरुद्धां
मुक्त्वा योद्धुं रणभुवमगादिन्द्रजिल्लक्ष्मणेन ॥ ७३ ॥
शस्त्राशस्त्रिप्रथमतुमुले संप्रहारेऽथ तस्मि-
स्तावस्यन्तौ निशितनिशितैराशुगैराशु तुल्यैः ।
दृष्ट्वा दृष्ट्वा दिवि दिविषदः स्वात्मनोऽभूतपूर्वे
चापाम्नाये चतुरवयवे मेनिरेऽभ्यासलाभम् ॥ ७४ ॥
मन्त्रैरन्यैः शमयितुमरिं लक्ष्मणोऽशक्नुवन्सन्
प्रायुङ्क्तास्त्रं सह रघुपतेर्नामिमन्त्रेण यर्हि ।
तर्ह्येवाभूच्छतमखरिपुर्भीममात्राविशेषो
मन्त्रोऽयं हि श्रुतिशतमहामन्त्रराट्सार्वभौमः ॥ ७५ ॥
तादृक्पुत्रव्यसनकलुषं विह्वलं राक्षसेन्द्रं
क्रोधावेशाज्जनकतनया तामिदानीं जिघांसुम् ।
सर्वार्थानां वरमपवर्गो नाथ लब्धप्रणाशा-
दित्युक्त्या तं प्रकृतिमनयत्तस्य मन्त्री सुपार्श्वः ॥ ७६
सर्वं मौलं बलमुपहरन्नाहवायावशेषं
गेहे गेहे किलकिलगिरा राक्षसीनां वितुन्नः ।
रक्षोराजो युधि रिपुमदानक्षतान्वीक्ष्य रुष्टः
कीशाधीशानतनुत शरासारवर्षी मृधार्तान् ॥ ७७ ॥
शक्त्या बिद्धं निशिचरपतिक्षिप्तयापत्तमूर्च्छं
सौमित्रिं द्रागनिलतनयो यामकुम्भोपदेशात् ।

Digitized by Google

आनीयाद्रिं पुनरपि निधिं सिद्धदिव्यौषधीनां
स्वस्थं चक्रे बलमपि मुदाक्लिष्टमक्लिष्टकर्मा ॥ ७८ ॥
साहाय्यार्थं त्रिदशपतिना प्रेषिते मातलीये
पूर्णे सर्वैस्तदुपकरणैर्दीप्यमाने रथाग्र्ये ।
रामं दृष्ट्वा समरदयितं ककुटामुत्कदेहं
देवाः साक्षादमृतकलशे दैत्यकान्तारवीषु ॥ ७९ ॥
तावारूढौ रथमतिरथौ मण्डलानि भ्रमन्तौ
स्पर्धारोषोऽप्यतिशयितया शिक्षया दोष्मतोऽरेः ।
धन्यंमन्यौ बहुमतवधूहारपुत्रप्रणाशा—
न्नातेनाते रणमनुपमं राघवो रावणश्च ॥ ८० ॥
नावाक्लाभुस्तरणिरघृणिर्विद्रुतो वह्निरासी—
च्छक्रश्चक्रभ्रममुपगतो भीतकम्पश्च मृत्युः ।
विष्टब्धोऽभूद्विधिरवमृतान्निष्टपस्य प्रतिष्ठां
सर्वं त्रस्तं समजनि तयोः संपराये प्रवृद्धे ॥ ८१ ॥
शस्त्राघाते तरलितमतिर्मोहितोऽन्यत्र यन्त्रा
लब्धाश्वासो यदपसरणं कारितं मे त्वयाद्य ।
अन्याय्यं वै तदिति तमधिक्षिप्य नेतानुनीतः
क्रुद्धोऽन्यतो निधिकरपतिर्भूय एवाजिमापत् ॥ ८२ ॥
तत्रागस्त्यः समरशिरसि श्रान्तिखिन्नाङ्गमुग्रं
दृष्ट्वा रामं पुनरपि युधे रावणं चापतन्तम् ।
अभ्येत्यास्मै सवितृहृदयं सिद्धिदं सद्य एव
श्रुत्वा गीतं निधिवदकरोत्सम्यगन्तं दिव्यमन्त्रम् ॥ ८३
तद्भावेन ज्वलितवपुषि द्विद्विरामे च रामे
हेलामात्राग्निवरपरिषद्भापनं रावणं च ।

Digitized by Google

तौ संरब्धौ चकितचकितं वीक्ष्य कीशाः प्लवङ्गाः
सर्वेऽप्यासन्गलितमनसो देहमात्रेण शेषाः ॥ ८४ ॥
यद्यच्छिन्नं दशमुखशिरः संगरे दृष्टवीर्यै-
र्बाणैस्तत्तत्सदृशमपरं तत्क्षणेन प्ररूढम् ।
एवं चैकोत्तरशतमधः पातयित्वा शिरांसि
श्रान्तो वान्तं यदयमगमद्राघवो नाप्युपायम् ॥ ८५ ॥
सूतेनाथो निपुणमतिना स्मारितो ब्राह्ममस्त्रं
गृह्णंश्चापे समधित विभुः प्रागगस्त्येन दत्तम् ।
वाजे वायुर्वसति च फले यस्य भास्वत्कृशानू
यद्वै पूर्वं भुवनगुरुणा निर्मितं वासवार्थम् ॥ ८६ ॥
तत्संधाने व्यचलदचला साटवी साचला च
ज्योतिश्चक्रं सह वसतिभिर्धिष्ण्यपानामफालीत् ।
वारां राशिः क्वथितसलिलो वाहिनीभिर्व्यशुष्य-
द्भूसोष्मभ्यां विततमचिरादस्तमागात्समस्तम् ॥ ८७ ॥
उद्घुष्योच्चैरशनिसदृशं तन्निसृष्टं महास्त्रं
रक्षोभूमी अविरलतया व्याप्य वेगेन गत्वा ।
आशासाने सुरमुनिगणे स्वस्ति गोब्राह्मणेभ्यो
वक्षः शत्रोरदयमभिदत्पापसंकल्पदुष्टम् ॥ ८८ ॥
भित्त्वा चास्मिन्प्रविशति पुनः स्वीयतूणीनिवासं
मुक्ताराव त्रिभुवनरिपौ वीरशय्यां प्रपन्ने ।
धीरोदात्तः किमपि सुमहत्कर्म कृत्वा सुराणां
रेजे धन्वी समिति विनयश्रीसखो वीररामः ॥ ८९ ॥
चक्रे दिव्या रघुपतिवपुर्वासितं पुष्पवृष्टिः
कीर्तिस्तस्य त्वखिलभुवनं वासितं पावितं च ।

Digitized by Google

आशीस्तस्मिन्कतिनि मरुतां मौनहस्त्यं भवाशी-
हसज्यान्ता वितरतितरामाशिषो यत्प्रसादः ॥ ९० ॥
शान्तं शय्यामथ शरमयीं प्रापितं वीक्ष्य शूरं
भ्रातृस्नेहाद्व्यलपदनुजो रावणस्याकुलात्मः ।
मन्ये भ्रातर्विधिरतितरां सर्वतो वै बलीया-
न्कः श्रद्दध्यात्तव गतिमिमां शौर्यराशेऽन्यथा चेत् ९१
धातुर्वंश्यो धनदसहजः शासिता देवतानां
लङ्काध्यक्षः श्रुतिषु कुशलस्तापसश्चासि धीमन् ।
तादृक्त्वं चेत्स्वयमगणयन्गृध्नुरन्यस्य दारा-
न्दैवादन्यं कमिह भुवने किं नु वोपालभेय ॥ ९२ ॥
स ह्येको नः सहज सहजस्नेहवान्कुम्भकर्णो
यन्नात्याक्षीदहमिव झटित्युत्पथस्थं भवन्तम् ।
नाप्यद्राक्षीद्विपदमपदे कारितां वा तवेमां
धिङ्मामात्मंभरिमपत्रयं दुःखमूले कुलस्य ॥ ९३ ॥
आक्रुश्यैवं बहु स विभुनाश्वासितो मैव शोच्या
वीरश्रेष्ठा इति तदमु तत्संस्क्रियां याचमानः ।
लेभेऽनुज्ञां न खलु मरणादूर्ध्वमप्यास्ति वैरं
कुर्वन्त्येष्टिं निशिचरपतेरग्रजस्येति तस्मात् ॥ ९४ ॥
ज्येष्ठा भर्तुर्विदितनिधना राक्षसेन्द्रस्य भार्या
स्त्रीणां सङ्घैः सह रणमहीमेत्य मन्दोदरीति ।
भिन्नोरस्कं भुवि ततभुजं तं समाश्लिष्य गाढं
दुःखोत्कत्वात्कृपणकरुणं वीरपत्नी व्यलापीत् ॥ ९५
शेषे वश्यां श्रियमपि कथं मामिवोपेक्षमाणः
किं न त्याज्यं व्यवसितमिति प्रत्यनीकं गतोऽसि ।

Digitized by Google

यज्ञूपुत्रीं क्षितिपदयितां काङ्क्षितामप्यविन्द-
न्माद्राक्षिष्टः [illegible] तत्सुतं तत्प्रियां च ॥ ९६ ॥

यत्प्राणेशो रजतगिरिधृग्यत्सुतः शक्रजेता
यत्सौन्दर्यं भुवनतिलकं पुष्पकं यद्विहारः ।
सा चेदेवं गतिमुपगता सर्वशोच्यामकस्मा-
दुच्चैरन्यैः किमिह विभवैर्यन्न मुह्यन्ति बुधाः ॥ ९७ ॥

धर्मे स्थित्वा मृतिरपि वरं नान्यथा सर्वसिद्धि-
नैवंवादी तव हिततमः का नु कथा त्वमैका ।
यस्या नीतिः सपदि फलिता मत्प्रक्षेपेण यस्मा
द्धेतुर्विघ्ना मिषति विपदे मत्कृतान्ते दुरन्ते ॥ ९८ ॥

न त्वं वध्यो यदपि सकलं सैन्यमुन्मूल्य सख्ये-
र्वीरश्लाघ्यां व्रजसि पदवीं [illegible]ध्याम् ।
नष्टैकाहं हतपतिसुता सर्वनाशं प्रपन्ना
हा हा भिन्नां किमिह करवै हा प्रियेत्याप मूर्च्छाम् ९९

आश्वास्यैनां तदनु विधिवत्तं च संस्कृत्य वह्नौ
लङ्काराज्ये विभुवचनतो लक्ष्मणेनाभिषिक्तः ।
आप्तैर्मित्रैः सह परिगमे राक्षसेन्द्रः कनीयान्
भक्त्या [illegible] ॥ १०० ॥

शुद्धां देवीं चिरविरहितां दर्शनौत्सुक्यपूर्णा
रक्षः[illegible]गुहान्तोपनाय्य [illegible]ताम् ।
संवर्तोद्यद्दहनसदृशा निर्दिधक्ष[illegible]
[illegible] सदसि महति व्याजहारेऽतिरूक्षम् १०१

नार्थः कश्चिज्जनकतनये विद्यते मे भवत्या
गृह्णीयात्कः परगृहगतां कामवश्योऽपि भार्याम् ।

Digitized by Google

यतस्त्वीदृग्गिरिगुपरिभवोच्छित्तये न त्वदर्थं
भद्रे रामस्त्वयि तु विमुखो याहि यत्राभिलाषः १०२
श्रुत्वा सा चाश्रुतचरमिदं भर्तृवाक्यं विरूपं
प्रस्विन्नाङ्गी मुकुलितमुखी साश्रुदग्रुद्धकण्ठा ।
संस्तभ्यान्तः कथमपि शुचं प्राह किं नार्यपुत्रो
जानीते मां स्वपदभक्तिकां सर्वभावेन शुद्धाम् १०३
गात्रस्पर्शः प्रसभहरणे राक्षसेन्द्रस्य योऽभू-
त्सोऽत्रोपायं कलयतु जनो दुर्बलः किं नु वायम् ।
इत्युक्त्वा सा स्वपतिहृदयं वीक्ष्य वह्नौ विशोध्य
स्वं चारित्रं प्रथयितुमनाः प्राविशद्धव्यवाहम् ॥ १०४
तत्रायाता विधिहरमुखा अस्तुवन्निर्जरास्तं
प्राहुस्तं त्वमखिलजगज्जन्मभङ्गस्थितीनाम् ।
स त्वं विष्णुर्दशरथसुतो भूभरध्वंसयेऽभूः
सीता लक्ष्मीर्न वहसि शुभां किं न्वविद्यानिवेति १०५
पातिव्रत्यज्वलितवपुषं तां समर्प्याथ तस्मा
इत्यूचेऽग्निस्तव दयितया सर्वभुक् शोधितोऽस्मि ।
पित्राश्लिष्टो हरिहयवरात्सर्वमुज्जीव्य सैन्यं
सीतारामः स्वपुरमनुगैः पुष्पकेण प्रतस्थे ॥ १०६ ॥
गच्छन् रामः समरपदवीं सागरं सेतुबन्धं
किष्किन्धादीनपि च विषयान्दर्शयित्वा प्रियायै ।
भारद्वाजाश्रमपदगतो याह्ययोध्यां हनूमन्
पूर्णः कालो व्यथितमनुजं जीवयेत्यादिदेश ॥ १०७॥
भ्रातुर्भक्त्या व्रतकृशतनुश्चीरवासा जटाली
वारं वारं मनसि भरतश्चिन्तयंस्तद्दिनानि ।

Digitized by Google

प्रत्यासन्नेऽहनि हनुमता श्राविते तस्य वृत्ते
ब्रह्मानन्दादयमधिकं संमदं संप्रपेदे ॥ १०८ ॥
भूयः श्रुत्वा विपिनचरितं विस्तरेणातितुष्टः
सर्वं भृत्यैर्झटिति नगरं कारयित्वोत्सवाढ्यम् ।
सोत्कण्ठाभिः प्रकृतिभिरयं ज्येष्ठसंदर्शनार्थी
नन्दिग्रामादभिमुखमगाद्यत्र रामस्य पन्थाः ॥ १०९ ॥
औत्सुक्यादनिमेषफुल्लनयने प्रोद्यन्मुखाम्भोरुहे
कृत्स्ने प्राञ्जलिमूर्धनि नगरजने सानेककोलाहले ।
रामः पुष्पकतोऽवरुह्य भरतं चालिङ्ग्य लेभे मुदं
यां नास्याः कलया पुनर्जनकजालाभोऽप्युपासीत्समा ११०
अन्योन्यं च यथोपचारमखिलेष्वभ्यर्चितेषु क्रमा-
द्याने वैश्रवणस्य वासभवनं प्रस्थापिते पुष्पके ।
आराद्विष्टरभाजमार्यमसकृन्नत्वा प्रसादादरा-
त्कैकेयीतनयो न्यवेदयदिदं सर्वेषु शुश्रूषुषु ॥ १११ ॥
माता मेऽग्रज पूजिता तव गिरा गुर्व्यं धुरोर्व्या भृशं
भुग्नग्रीवमिमं न पश्यसि जनं न्यासं प्रतीच्छाधुना ।
नो चेत्त्वज्जनके पितुश्च विहितं व्यर्थः प्रयासो भवे-
दित्युक्तस्तव पूरयाम्यभिमतं वत्सेति रामोऽब्रवीत् ११२
संस्नाप्याथ जटा महार्हवसनो राज्ञोपबर्होज्ज्वलः
प्राप्य स्वं नगरं महोत्सवयुतं संसेव्यमानोऽनुजैः ।
इक्ष्वाकुप्रमुखैर्महेन्द्रसदृशैरध्यासितं राजभिः
प्रत्युप्तं मणिकाञ्चनादिभिरलंचक्रे स सिंहासनम् ११३
तीर्थैः पुण्यतमैर्वलीमुखहृतैः सर्वौषधीनां रसैः
संपृक्तैश्च सुवर्णकुम्भभरितैर्मन्त्रोत्तमैः संस्कृतैः ।

ऋत्विग्भिर्भगवान्समेत्य सचिवैश्चान्यैर्वसिष्ठो मुनिः
श्रीरामं सहसीतमासनगतं राज्येऽभ्यषिञ्चद्विभुम् ११४

दृष्ट्वा रत्नकिरीटशोभितमुखं श्वेतातपत्राङ्कितै-
रैन्द्रथ्या चामिलनीतवातिरुचिरं तं वैजयन्त्या स्रजा ।
देव्यालंकृतवामपार्श्वमधिपं देदीप्यमानं श्रिया
चक्षुष्मत्त्वफलं समग्रमधुना लब्धं जना मेनिरे ॥ ११५ ॥

गन्धर्वा मुदिता जगुः प्रननृतुः स्वर्वारनारीजनाः
सिद्धाः साध्यगणैः समं मुखरयामासुस्तदातोद्यकम् ।
अस्वप्ना ववृषुः सुमानि परया भक्त्यैव तत्तुष्टुवु-
र्लोकानन्दकरे शिवाब्धिभवने रामाभिषेकोत्सवे ११६

सुग्रीवे च विभीषणे च विविधलांमानय निर्मुक्तयो-
र्यातेष्वप्युपचारपूर्वमितरेष्वभ्यागतेषु क्रमात् ।
श्रीरामः स्वयमाचरन्नभिहितान्याश्रमस्थांस्तथापरा-
न्सर्वं पालयति स्म भूपमिषतो धर्मप्रतिष्ठापकः ॥ ११७ ॥

आदित्यादिविप्रवृद्धान्विबुधः प्रातः शुचिः सेवते
मध्याह्ने सचिवैः समेत्य कुरुते सम्यक् प्रजानां हितम्
वैदेहीकुचकुम्भसंभ्रमकरी रम्यं निशास्वीहते
सर्वत्रैव हि धर्ममेव मनुते मूलं फलं च प्रभुः ॥ ११८ ॥

न व्याधिर्न जराभयं न पलितं नाकालमृत्योर्भयं
न व्यालीयभयं न भीतिजभयं न क्षुत्पिपासाभयम् ।
नान्यस्माच्च भयं बभूव महतः क्षुद्राच्च वा मारुतः
सर्वं निर्भयमेव नित्यमुदितं रामे जगन्नायके ॥ ११९ ॥

न स्वैरी भुवनत्रयेऽपि च कुतः स्यात्स्वैरिणीनां कथा
न स्तेनो न च कूटवाङ्न च शठो नामाहिताग्निर्जनः ।

Digitized by Google

निष्कामा अभवन्स्वधर्मनिरताः सर्वे च वर्णाश्रमाः
पातिव्रत्यपराः स्त्रियश्च सुभगाः सीतायशःकामुकाः ॥
काले वर्षति वासवः क्रतुभुजो नित्यं हविर्भागिनो
भूमिः सर्वसमृद्धिभाग्द्विजवरा ब्राह्म्या श्रिया भास्वराः ।
गावः कामदुघा नृपा नयपरा रत्नाकरो वारिधिः
सर्वं चर्धतमं बभूव भुवने रामे जगन्नायके ॥ १२१ ॥
शास्त्रे धर्मविनिश्चये वितरणे सत्ये क्षमायां शुचौ
कारुण्ये विनये नये च धनुषि प्रागल्भ्यगाम्भीर्ययोः
अन्यस्मिन्नपि यत्र कुत्र च गुणाख्याने हि सर्वात्मना
रामो राम इति श्रुतिः क्षितितले सार्वत्रिकी पप्रथे १२२
क्रीडाताडितताटकः शिवधनुर्भङ्क्ता मुनेः शासिता
भ्रात्रे न्यासितपादुकः खररिपुर्वाल्यन्तकः सेतुकृत् ।
संख्ये रावणकुम्भकर्णनिधनप्रोच्चण्डदोर्विक्रमो
रामो दाशरथिर्जगत्त्रयपतिः सीतापतिर्मे गतिः १२३
लीलामानुषविग्रहे परतरे रामाभिधे श्रीपतौ
चेतोवृत्त्यनुवृत्तये कृतमिदं संक्षिप्तरामायणम् ।
आचन्द्रार्कमियं कृतिर्विजयतां सीतापतेराज्ञया
तन्नामस्मरणं हि सर्वजगतां सद्यः परं मङ्गलम् १२४

इति श्रीमुहुसुब्बकविविरचिते संक्षिप्तरामायणे
युद्धकाण्डः
समाप्तश्चायं ग्रन्थः

ॐ तत्सत्

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Widener Library
3 2044 105 329 742
Digitized by Google